

Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO.	NEW	206	OLD	162
FOLIO	047			

TITLE

1. अनुमितिग्रंथ । 2. पंचलक्षणी ।
3. सामान्यनिरुक्तिः ।

ग०ध०

श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥श्रीलक्ष्मीनृसिंहायनमः॥हेत्वाभासनिरूपणेप्रसंगस्यापिसंगतित्वंसंभवतिव्याप्तिपक्षधर्मताविशिष्टहेतुनि
रूपणेव्याप्तिपक्षधर्मताविरोधितद्विरहवतोदुष्टहेतोःस्मरणात्तत्तदप्रदर्शकमूलस्यन्यूनतांपरिजिहीर्षुःप्रसंगस्यापितन्निरूपणप्रयोजकत्वमाह॥ए नेन
१ तान्नैतेति॥परिकरोव्याप्तिपक्षधर्मतेनिरूप्येतेतयंतउक्तक्रमेणदुष्टहेतोःस्मृतत्वस्यप्रसंगनिर्वाहकस्यलाभायतत्प्रसंगादिति॥सपरिकरहेतुनिरूपित
प्रसंगतेरित्यर्थः॥तज्ज्ञानजन्यजिज्ञासाधीनत्वंपंचम्यर्थः॥अन्वयप्रश्नास्यनिरूपणमित्यनेनतत्त्वनिर्णयविजयप्रयोजकत्वादितिमूलस्यापिहेत्वाभासनि
मा ष्टतत्त्वनिर्णयादिजनकज्ञानविषयत्वार्थकताशिष्यप्रश्नत्युपयोगिनिरूपणघटकज्ञानप्रयोजनदर्शनपरंतथापितन्मात्रपरत्वेसंगत्यप्रदर्शनेन
न्यूनतास्यादितितस्यएककार्यकारित्वरूपसंगतिप्रदर्शनपरत्वमपिसंभवतीतिस्फुटीकर्तुमाह॥तत्त्वनिर्णयादिति॥आदिपदाद्विजयपरिग्रहः॥
तत्कार्यकारित्वात्॥सपरिकरहेतुप्रयोज्यंप्रयोजकत्वात्प्रयोजकत्वंचैनकतावच्छेदकादिसाधारणमतःस्वविषयकज्ञानकार्यंप्रतिस्वस्यतथात्व जनक
मस्तूतमेवतत्त्वनिर्णयः॥प्रमितकोटिनिश्चयःतत्रव्याप्तिपक्षधर्मताविशिष्टस्यसद्धेतुज्ञानमिवतद्विपरीतकोटिसाधकस्यहेत्वाभासत्वज्ञानमप्युपयु
ज्यतेप्रतिबंधकीभूतविरोधिकोटिव्याप्यवत्ताज्ञानेप्रामाण्यग्राहकत्वादित्युभयोस्तत्त्वनिर्णयप्रयोजकत्वंअथवातत्त्वनिर्णयःसाध्यवत्ताज्ञप्रमा
त्वनिश्चयःतत्रानुमापकहेतोर्व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानमिवविपरीतकोटिसाधकहेतोर्दुष्टत्वज्ञानमप्युपयुज्यतेप्रकृतसाध्यप्र

हाप्रामाण्यग्राहकविपरीतकोटिसाधकहेत्वदुष्टत्वमहविघटत्वात् [illegible]जयप्रयोजकत्वंच हेत्वाभासस्यस्य ज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वाराव्याप्त्या
दिविशिष्टहेतोः स्वज्ञानाधीनसंन्यायप्रयोगद्वाराबोध्यं ॥ मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषघतिव्याप्तिः ॥ यथार्थज्ञाननिष्ठानुमितिप्रतिबं
धकतावच्छेदकविषयताश्रयत्वपर्यंतस्य समूहालंबनज्ञानविषयताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे विवक्षणीयतया बाधादिज्ञानप्रति
बंधकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वात्तत्र हेत्वाव्याप्तिश्च ॥ यद्विषयकत्वेनेत्यादिलक्षणेऽच तृतीयया अवच्छेदकतार्थकतायाः कृत
रांत्तर्थेत्यत आह यथाश्रुतमित्यादि इदं एतल्लक्षणत्रयं न दुष्टहेतुवद् आभासे वेद इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वात् दुष्टहेतुनिरूपणस्यैव प्रति
ज्ञातत्वात्तल्लक्षणमेवाकांक्षितं अतस्तदनुक्तेर्मूलस्य न्यूनता अन्यविधव्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वसंभवेऽपि तत्त्वेत्यादिना दुष्टहेतू
नामेव विभजनात् दुष्टहेतुनिरूपणस्याप्रतिज्ञातत्वेन तदसंगतः ॥ एवं दुष्टहेतुनिरूपणस्याप्रकृतत्वे दुष्टहेतूनां संकरेण विभागोपपादनपरस्यासं
गतिरित्यत आह तद्वत्त्वं चेति ॥ तादृशदोषवत्त्वं चेत्यर्थः दुष्टहेतूनां लक्षणमित्यनुषज्यते स्फुटमिति शेषः तथा च दुष्टहेतुनिरूपणस्य प्रकृतत्वे
पि दोषलक्षणकृतेन दुष्टहेतुलक्षणस्य स्फुटतया लाभेन नोक्तानुपपत्तिरिति भावः तदभिप्रायेणैवेति ॥ दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः

दुष्टहेतूनां विभागानर्हतया
विभागव्याघातशंकाया अभवतामादुष्टपक्षे परसांकर्यपक्ष्यादिग्रंथस्य उपाध्यसंकरेण

गढध०

अनुमितिपदस्यअनुमितिसामान्यपरत्वेतिप्रसंगात्प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकंतथाचव्यभिचारादाव्याप्तिर्वह्निर्धूमव्यभिचा
२ रीत्यादिज्ञानाभावस्यपर्वतोधूमवानित्याद्यनुमित्यजनकत्वात्[illegible]क्षणयातस्यतादृशानुमितिकारणज्ञानमात्रपरत्वेबाधादाव्याप्तिर्बाधादिज्ञान
स्यपरामर्शाप्रतिबंधकत्वात्अतोअनुमितिपदमजहत्स्वार्थलक्षणयात्तदुभयपरतयाव्याचष्टेतेनेतितादृशलक्षणवाक्यइत्यर्थः।।लक्षणघट
कतावच्छेदकमुभयसाधारणमनुगतंरूपमाह अनुमितिनिष्ठकार्यतानिरूपकसंबंधित्वेति।।अनुमितिपदस्यप्रकृतपक्षतावच्छेदकविशिष्टप्रकृ नै
तसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वंस्वयमेवदर्शयिष्यतिअतोनवक्ष्यमाणातिप्रसंगः निरू
पकत्वंचयदिप्रतियोगित्वंतदाकार्यस्यकार्यताप्रतियोगित्वाभावादनुमित्यसंग्रहः अतःसंबंधिपदंसंबंधिद्वयसाधारणस्यतत्साक्षात्कारजन
कसाक्षात्कारविषयतात्मकनिरूपकत्वस्यलाभाय[illegible]पर्वतोवह्निमान्हृदश्चनतथाइत्यादिसमूहालंबनानुमित्यादिविरोधिन्हृदनिष्ठवन्ह्या
भावादिरूपबाधादेःपर्वतादौधूमादिनावन्ह्यादिसाधनेदोषताप्रसंगः।।प्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधिग्रहत्वस्यकस्यापिप्रतिबध्यता
नवच्छेदकतयातदवच्छिन्ननिरूपितप्रतिबंधकतानिवेशनासंभवात्।।तथाविधग्रहत्वव्यापकप्रतिबध्यतानिवेशेचअनुमित्यविरोधिनि
व्यभिचारादौपरामर्शाविरोधिनिबाधादौचाव्याप्तिःउभयविरोधिपक्षासिध्यादावेवतादृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्वात्

२

दलः कल्पांतरमाह साध्यव्याप्येति प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नव्याप्तिविशिष्टप्रकृतहेतुना
वच्छेदकावच्छिन्नप्रकारकानुमितिसामान्यपरमित्यर्थः ॥ एवं च ताद्रूप्यसमूहालंबनानुमितेर्व्याप्त्यादिविषयकतया व्यभिचारज्ञानादिप्रति
बध्यत्वात्तेन व्यभिचाराद्यसंग्रहः दर्शितसमूहालंबनानुमितिप्रतिबंधकतामादाय दर्शितातिप्रसंगस्य वारणाय सामान्यपदं तथा च ता
द्रूप्यानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताशालियथार्थज्ञानविषयत्वं पर्यवसितार्थः एवं च साध्यतावच्छेदकावच्छिन्ना
दिप्रकारकानुमितिसामान्यांतर्गतायां पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चेत्याद्यनुमितौ ह्रदो वह्निमानित्यादिनिश्चयस्याप्रतिबंधकत्वा
न्नातिव्याप्तिरिति भावः बाधासत्प्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिष्वव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनि
वेशः द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविधनिश्चयस्याप्रतिबंधकत्वात्तद्दोषतादवस्थ्यं अतः पक्षतावच्छेदकावच्छिन्नत्वोपादान
अवच्छेदकसंबंधेन तत्पर्याप्त्यधिकरणत्वं तेन तेजस्वी पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिव्याप्यभावरूपबाधस्य कांचनमयः मति
पर्वतो वह्निमानित्यादौ पक्षाप्रसिद्धेः शुद्धपर्वतत्वावच्छिन्नपक्षकानुमित्यविरोधित्वे [illegible] बाधसत्प्रतिपक्षयोरव्याप्तिः तत्र प्रकृतसा
ध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेपि तद्दोषतादवस्थ्यं वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूम

२ पिनासंग्रहः एवमग्रेपि वाध्यं साध्यतावच्छेदकावच्छिन्नसाध्यप्रका
रकत्वानिवेशे परामर्शाविरोधि

ग-५०

बांश्चन्हि इत्याद्यनुमित्यप्रतिबंधकत्वात्साध्याप्रसिद्ध्या व्याप्तिवारणप्रयोजनकत्वं तदुपादानस्येति तुन्न सत् वह्निर्नकांचनमय इत्यादि नि
३ र्णयस्य पक्षेस्फस्य वह्नित्वादिना वह्न्याद्यनुमित्यविरोधित्वेपि द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नांतर्भावसत्वात्तस्य कांचनमयवह्नि
व्याप्यधूमवान्पर्वत इत्यनुमितिविरोधितया तत्र लक्षणगमनाद्द्वितीयदलप्रवेशाद्व्यभिचारविरोधसाधनप्रसिद्धिस्वरूपासिद्धिपुना
व्याप्तिः तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टत्वनिवेशाद्व्यभिचारविरोधयोर्नाव्याप्तिः वह्निर्धूमव्यभिचारीत्यादिज्ञा
नदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तिभानसंभवात्तद्दोषतादवस्थ्यमतो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवेशः अन्व
यव्याप्तिव्यतिरेकव्याप्त्योर्विशेष्योपादाय तदुभयविशिष्टहेतुप्रकारकत्वमेव निवेश्यं एकतरमात्रोपादाने साधारण्यानुपसंहारित्वयो
रेकतरासंग्रहप्रसंगादित्यग्रे व्यक्तीभविष्यतीयद्दशाव्याप्तिद्वयप्रकारतानिरूपितहेतुप्रकारतायास्तत्साध्यकतद्धेतुकानुमितिज
नकतावच्छेदकप्रकारतात्वेनानुगमप्यनिवेशस्कन संभवति साध्याभाववद्वृत्तित्वादिज्ञानदशायां केवलव्यतिरेकव्याप्त्यादिप्रका
क रहेतुमत्ताज्ञानोत्पत्त्यसाधारण्यादेस्तादृशप्रकारताशाल्यनुमितिसामान्यविरोधित्वाभावात् व्याप्तिविशिष्टविषयत्वमात्रस्य हि शि नादृशा २
ष्टविषयत्वमात्रस्य तद्विशिष्टहेतुतावच्छेदकावच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्धाव्याप्तिरतः पक्षांशे तादृशाव्या

३

प्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशः पक्षांशेव्याप्तिविशिष्टप्रकारकत्वमात्रनिवेशेपितद्दोषतादवस्थ्यं धूमाभाववान् ह्र
द इत्यादिज्ञानस्य द्रव्यत्वादिनाहेतुमत्ताज्ञानाविरोधित्वात्साधारण एव व्याप्तिस्सवह्नित्वाद्यवच्छिन्ने धूमाभाववद्वृत्तित्वादिग्रहस्य धूमा
दिव्याप्तिविशिष्टतद्व्यक्तित्वावच्छिन्नप्रकारकज्ञानाविरोधित्वादतोहेतुतावच्छेदकावच्छिन्नत्वनिवेशः ॥ साध्यव्याप्यहेतुपक्षांशेहेतुसा
ध्यादिप्रकारकस्य संस्कारादेराहार्यज्ञानादेश्च बाधादिज्ञानाप्रतिबध्यत्वादसंभव इत्यतस्तादृशानुमितित्वप्रवेशः साध्यव्याप्यहेतुधर्मिताव
च्छेदकसाध्यवत्ताज्ञानस्यैव साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकतया तादृशाकारशालित्वन स्वरसात्तादृशहेतुविशिष्टपक्षता
वच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यताकत्वस्य लक्षणघटकत्वोपगमे पर्वतत्वाद्य
वच्छेदेन वह्न्यादेः साध्यत्वे तत्सामानाधिकरण्येन साध्याभावादेरदोषत्वप्रसंगः सामानाधिकरण्यमात्रावगाहिबाधादिज्ञानस्य शुद्धपर्वतत्वा
वच्छेदेन वह्न्यादिज्ञानं प्रत्येव प्रतिबंधकतया धूमविशिष्टपर्वतत्वावच्छिन्नधर्मिकवह्न्यादिज्ञानाप्रतिबंधकत्वादिति तन्नोक्तं ॥ न च विशेष्य
तावच्छेदककोटौ धूमादेरधिकस्य भानेपि शुद्धपर्वतत्वावच्छिन्नसंयोगादेर्यत्र संसर्गता तत्र पर्वतत्वसामानाधिकरण्येन वह्न्यभावादिज्ञान
स्य प्रतिबंधकत्वमावश्यकं तादृशानुमितेरपि शुद्धपर्वतत्वावच्छेदेन वह्न्याद्यवगाहित्वादिति वाच्यं ॥ धर्मितावच्छेदकावच्छेदेन विशि

ष्टबुद्धौधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमेवसंसर्गोऽवभासतेनतुतदेकदेशावच्छिन्नत्वमपिधर्मावच्छिन्नविशेष्यतानिरूपिततदेक
८ देशाव्यापकत्वावच्छिन्नसंसर्गतायाअप्रामाणिकत्वात्॥ अथलिंगोपधानमतेहेतोः सर्वत्रैवधर्मितावच्छेदकतयाभानात्तादृशसंसर्गताभ्युपगमआ
वश्यकः॥ अन्यथाशुद्धपर्वतत्वाद्यवच्छेदेनहेतुमत्ताज्ञानस्थलेपिहेतुविशिष्टपर्वतत्वाद्यवच्छिन्नसंयोगादिसंसर्गकानुमितेरेवोपगमेपर्वतत्वा
दिसामानाधिकरण्यमात्रावगाहिबाधादिग्रहकालेपितथाविधसाध्यनिश्चयवतोनुमित्यापत्तेः॥ नहिसामानाधिकरण्येनबाधसिद्ध्योस्तथाविधयो
रनुमितिंकश्चिद्रूपेतितादृशबाधादिग्रहस्यक्वचिदप्यनुमितौप्रतिबंधकत्वासंभवात्तेषांहेत्वाभासताविलोपापत्तेश्चेतिचेदेवमपिलिंगानुपधा
नमतेतादृशविषयतायाःप्रमाणविरहएव॥ प्रकृतग्रंथस्तुनलिंगोपधानमताभिप्रायकस्तन्मतेअनुमितेःसर्वत्रैवतथाकारतयातादृशाका
रस्याव्यावर्तकतयाअनुमितिपदस्यतादृशानुमितिपरत्वेनवर्णनासंगतेः केचित्तुलिंगानुपधानमतेनुमितिपदस्यनउभयपरत्वंव्याख्याय
यथाश्रुतार्थपरतानिर्वाहायलिंगोपधानमतमेवाश्रयतेसाध्यव्याप्येत्यादिनाइत्याकारकानुमितिपरंअनुमितेरित्याकारंतामताभिप्रायक
मितिव्याचक्षतेएतादृशव्याख्याप्रयोजनंस्फुरयतितेनेति॥ एकत्रवह्नित्वाद्येकधर्मावच्छिन्नेव्यभिचारादीत्यादिनास्वरूपासिद्ध्यादिपरिग्र
न हः अन्यस्यपरामर्शोतद्वह्नित्वाद्यपरूपावच्छिन्नव्याप्तिपक्षधर्मतावगाहिज्ञानात्॥ व्यभिचारादित्यादिहेतोः अनुमित्यजनकत्वेपीत्यनेन

न त२

संबंधः॥ ॥ तद्रूपावछिन्नेव्यभिचारज्ञानोत्पत्तौद्वितीयक्षणेकथंचित्तद्रूपावछिंन्नलिंगकपरामर्शस्तत्क्षणेकविलंबेनानुमित्युपगमेव्यभिचारासंभ
वात्ननतत्रव्यभिचारोदर्शितः॥ नन्वनुतद्धर्मावछिन्नलिंगकानुमितौधर्मावछिन्नधर्मिकव्यभिचारज्ञानाभावस्यहेतुत्वोपगमान्नोक्तव्यभिचारःतद्ध
र्मावछिन्नलिंगकत्वंचाव्यवहितोत्तरत्वसंबंधेनतद्रूपावछिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वंतादृशसंबंधेनव्यभिचारज्ञानविशिष्टंयत्तदन्य
त्वमेववाजन्यतावछेदकंतेनधूमव्याप्यवह्निमानयमित्याकारकज्ञानाद्यादिपरामर्शोत्पत्तिद्वितीयक्षणेयत्रलौकिकसंन्निकर्षजन्योधूमव्यभिचा
रीवह्निर्धूमव्याप्यंधनवानित्याकारकसमूहालंबनहेतुत्यद्वस्तज्जन्यानुमितेरुक्तसंबंधेनवह्नित्वावछिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्ट
त्वेपिनक्षतिरतआह व्याप्त्यादिज्ञानेतिकृतकारणतावत्कव्याप्त्यादिज्ञानसत्वेव्यभिचारज्ञानाद्यभावव्यतिरेकेणानुमितिव्यतिरेकस्यासि
द्धत्वादितिभावः व्याप्तिज्ञानादिर्व्यभिचारज्ञानाभावेनान्यथासिद्धत्वशंकाचप्रागेवनिराकृतानस्मातिः॥ नव्यभिचारादावव्याप्तिः॥ यत्रज्ञ
सत्येतुविशेषेणतादृशानुमितेरप्रसिद्धिस्तत्रान्यदोषेषुव्याप्तेर्वक्ष्यमाणतयैतादृशायथाश्रुतव्याख्यायामनिर्भरस्तत्रनायेववदंतीति॥ पर्व
तोवह्निमान्धूमादित्यादिसद्धेतुस्थलेबाधादिभ्रमविषयेअतिव्याप्तिवारकतयायथाश्रुतेयथा पदंसार्थकयसि॥ पर्वतोवह्निरितिअत्र
इतिपदस्यस्थलत्रयेप्रत्येकंसंबंधात्भ्रमत्रयलाभःप्रत्येकभ्रममात्राशयेवातिप्रसंगसंभवात्तादृशसमूहालंबनभ्रमपरत्वासंगतेरितिध्येय

यं॥ प्रथमभ्रमोनुमितिप्रतिबंधकः अन्योन्यत्वज्जनकज्ञानेनतथात्वयोरपिप्रथमेन्यत्रप्रसिद्धस्यसाध्याभाववद्वृत्तित्वस्यधूमांशेभ्रमत्वं अंत्ये
प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिध्यानतद्भ्रमत्वंकिंतुअभावांशेअनुयोगिताविशेषसंबंधेनसाध्यस्यभ्रमत्वमित्येतादृशविशेषमादृत्य
शिष्यव्युत्पादनायानेकविधभ्रमप्रदर्शनं॥इदंत्ववधेयं अभिधेयत्वंप्रमेयत्वस्यव्यभिचारीत्यत्रस्वरूपसंबंधावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्र
तियोगिताकत्वसंबंधेनप्रमेयत्वस्यभ्रमोवाच्यः प्रतियोगितांशेसाध्यतावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयोःसा
ध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतयातदंशेतदुभयावगाहिव्यभिचारज्ञानस्यैवव्याप्तिज्ञानविरोधित्वात् एवंचभेदप्रमेयत्वत्वावच्छिन्न
प्रतियोगिताकत्वस्यप्रसिद्धावपिस्वरूपसंबंधावच्छिन्नतादृशप्रतियोगिताकत्वाप्रसिध्यातादृशभ्रमानुपपत्तिः प्रतियोगितांशेसंबंधावि
शेषावच्छिन्नत्वस्यभ्रमइत्यपिनयुक्तंतस्यसंबंधघटकतयातत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तेः नन्वेतद्रूपेणप्रतियोगिताप्रकारकए
वात्रभ्रमोविवक्षितोनतुतदवच्छिन्नप्रतियोगिताकत्वसंसर्गकइतिवाच्यंलाघवात्प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिहेतुतयातत्प्रकार
कव्यभिचारज्ञानस्याकिंचित्करत्वात् अत्राहुः स्वावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यतावच्छेदकवत्वभे
व दाभावस्यसाध्याभाववद्वृत्तित्वरूपव्याप्तिघटकंलाघवात् एवंचतादृशसंबंधेनाभावांशेसाध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्यव्याप्ति

यहविरोधितयाघटत्वादेः प्रसिध्येन ताद्रशसंबंधेन मेयत्वत्वादेरभावो भ्रमात्मक एव तथाविधोग्रहो विवक्षित इति न किंचिदनुपपन्नं प्रथमे सा
ध्याभाववद्वृत्तित्वज्ञानविरोधी हेतौ साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य भ्रमः द्वितीये च तदप्रसिध्या व्यापकसामानाधिकरण्यज्ञानविरोधी
साध्यतावछेदके हेतुसमानाधिकरणाभावप्रतियोगितावछेदकत्वस्य भ्रमो भिमतः असमानप्रकारकज्ञानस्याविरोधितया द्विविधव्यभिचा
रसंग्रहाय द्विविधव्याप्तिविषयकसमूहालंबनज्ञानस्यैव लक्षणे निवेशनीयत्वात् न च हेतुः साध्यं व्यभिचारीत्यत्र साध्यतावछेदके हेतुसमा स्य
नाधिकरणाभावप्रतियोगितावछेदकत्वस्य दुर्लभतया तद्वगाहिज्ञानस्याभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्याकारकता नोपपद्यत इति वाच्यं॥
यतो अभाववद्वृत्तित्वं समानाधिकरणाभावप्रतियोगितावछेदकत्वं चेति द्वयमेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्यभिचारपदार्थः तत्र प्रथमे व्य भिचारनाम
भिचारपदार्थैकदेशोभावे अनुयोगितारूपषष्ठ्यर्थस्य नञ्प्रकृत्यर्थतावछेदकवह्नित्वाद्यवछिन्ननिरूपितत्वसंबंधेन प्रकृत्यर्थस्यान्वयः म यकिस्यत्वेषु
त्वर्थस्याधार्थः स्वरूपसंबंधवान् तस्य चाभेदेन प्रथमान्तार्थे अन्वयः द्वितीये तत्पदार्थपरवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्था
न्वितप्रथमार्थनिरूपितत्वस्यान्वयः षष्ठीप्रकृतेस्तत्धर्मपरतया षष्ठ्यंतार्थस्य साध्यतावछेदकनिष्ठत्वस्य तादृशान्वयबलेभ्य हेतुसमानाधि ८२
न करणाभावप्रतियोगितावछेदकत्वैस्य तद्धितार्थसंबंधिनएदेकदेशोघटकत्वरूपसंबंधेसंबंधिनश्चाभेदेन प्रथमान्तार्थे अन्वयः॥ एवं चोक्तवाक्या

तत्रसाध्यतावच्छेदकेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यापित्वाभावात्तत्रतदवगाहिभ्रमस्यदर्शिताकारतासंभवादित्यपिवदं
६ भ्रमादितिपंचम्यर्थः प्रयुक्तत्वंतस्यप्रतिबंधपदार्थेऽनुत्पादेऽन्वयः ॥ यथार्थेतीति ॥ यथार्थपददानेनवस्तुव्यधिकरणप्रकारावच्छिन्ना
यायाविषयतातन्निरूपकत्वस्यसंवादिप्रमात्वस्यविवक्षणीयतयादर्शितभ्रमाणांकिंचिद्दोषप्रमात्वेपिनतेनायंदोषइतिभावः ॥ अत्रयथार्थ
पदेनसद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषयसाध्याभावादावपिप्रसंगवारणेपिअसद्धेतुस्थलेतादृशप्रमाविषयदोषघटकसाध्यादेः
प्रत्येकंदोषत्वापत्तिर्दुर्वारैवतदर्थंप्रकारांतरौतरानुसरणेचततएवपूर्वदोषस्यापिवारणसंभवेयथार्थपदंव्यर्थमितिदोषस्यदुरुद्धरतयानतस्यैवयथा
र्थपदाघटितलक्षणांतरारनुसरणीयबीजत्वमाह ॥ नन्वितिएकदेशस्यापिविशिष्टघटकतयाहेत्वाभासपदार्थत्वस्येष्टत्वादाह ॥ प्रत्येकपदा
र्थेपर्याप्तसाध्यतावच्छेदकावच्छिन्नस्येत्यर्थः ॥ हेत्वाभासत्वापत्तिः ॥ हेत्वाभासपदार्थत्वापत्तिः यद्रूपावच्छिन्नज्ञानस्यानुमितिविरोधित्वंतद्रू
पावच्छिन्नेहेत्वाभासत्वव्यवहारस्यतद्रूपावच्छिन्नमात्रज्ञानाद्धेतोर्दुष्टत्वव्यवहारस्यचानुभूयमानत्वेष्टापत्तिर्नसंभवतीतिभावः ॥ यादृशवि
शिष्टविषयकत्वंतादृशानुमितिविरोधितानतिरिक्तवृत्तित्वमितिविवक्षयानसाध्याद्यवतिव्याप्तिरित्याशंकते ॥ अथेतिविशिष्टविषय
कंसाध्याभाववद्वृत्तित्वविशिष्टसाधनादिविषयकंभवतद्दुष्टंचतादृशाविशिष्टघटकप्रत्येकपदार्थविषयकत्वंचनविशिष्टंनता।

दत्त्वविशिष्टनिरूपितं तथाच प्रत्येकपदार्थविषयकत्वस्य प्रतिबंधकतातिरिक्तवृत्तित्वान्नातिव्याप्तिरितिभावः॥ यथार्थमितियथार्थपदादानेपि
न सद्धेतुस्थलेतिव्याप्तिवारणसंभवात्॥ ननु अत्र भ्रमविषयप्रत्येकपदार्थस्याकीर्त्यावारणेपि तद्विषयविशिष्टेतिव्याप्तिरत आह भ्रमविषयेति॥
अप्रसिद्धत्वादिति॥ तथाच कातिव्याप्तिरितिभावः॥ केचित्तु ननु अस्य दुष्टहेतुलक्षणत्वेदोषघतिव्याप्तिस्तेषामप्यनुमितिविरोधियथा
र्थज्ञानविषयत्वात् नह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकस्थले वन्ह्यभाववद्ध्रदादिरूपदोषाणामपि दुष्टहेतुत्वमिष्टमेवेतिवा
च्यं॥ तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थलेतेनरूपेणदुष्टस्य लक्षणं यदि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानु
मितिविरोधियथार्थज्ञानविषयत्वमात्रं तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधकप्रमाविष
यवन्ह्यभाववद्ध्रदादीनां धूमत्वादिना दुष्टत्वाभावाद अतिव्याप्तिरित्याशंकां परिजिहीर्षुस्तादृशाभावप्रतियोगिनां ज्ञानमिति षष्ठीसमास यथार्थ.
माश्रित्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्याख्यास्यति तत्र च ज्ञायमानदोषप्रतिबंधकतामतएवसंगच्छतेअव
स्तन्मतमवलंबतेतेनेति॥ तत्तुलक्षणेषु मध्ये इत्यर्थः॥ तृतीयलक्षणस्य सर्वमतएव ज्ञायमानदोषप्रतिबंधकतामताभिप्रायकतया दृष्टांतत्वेनोपन्या
सः॥ तदर्थश्चेति॥ प्रतियोग्यंतेनदोषानादायलक्षणं संगमनीयमिति दर्शयितुं व्यभिचारादयइति॥ नतुनेनरूपेण लक्षणघटकत्वमित्यवधेयं॥